# dharmapurI godAvarI varNanam

# ધર્મપુરી ગોદાવરી વર્ણનમ્

## Document Information

Text title : Verses praising Sacred Dharmapuri and Godavari

File name : dharmapurIgodAvarIvarNanam.itx

Category : devii, koriDevishvanAthasharmA, nadI, devI

Location : doc_devii

Author : koriDe vishvanAthasharmA, dharmapurI

Transliterated by : koriDe vishvanAthasharmA

Proofread by : koriDe vishvanAthasharmA

Acknowledge-Permission: Koride Vishwanatha Sharma

Latest update : February 19, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 28, 2023

*sanskritdocuments.org*

# ધર્મપુરી ગોદાવરી વર્ણનમ્

કોરિડે વિશ્વનાથ શર્મા સંસ્કૃતોપન્યાસકઃ
શ્રી લક્ષ્મી નરસિંહસંસ્કૃતાન્ધ્ર કલાશાલા

અયિકરિકર્ણિક ! મૂષિકવાહન!! પર્વતજાસુત ! સામ્બપ્રિય !
નુતજનપોષક ! ષણ્મુખસેવિત ! શઙ્કરચુમ્બિતફાલતટ! ।
વરચતુરાનનદેવગણાર્ચિત ! દાનવભઞ્જક ! દાસરત!
જય ગણનાયક ! વિઘ્નવિનાશક ! ધર્મપુરીજનપાલ વિભો!

અયિનિજમૂર્ધજપાશજટોદ્ભવગૌતમજાસિકતોદ્ભવ ભોઃ
વરરઘુવંશકલાનિધિકીર્તિતરાઘવસેવિતલિઙ્ગતનો! ।
નિજવરભક્તકૃતાઘવિનાશક દાસજનાર્થિતદાનરતે!
જય રજનીકરભૂષિતશેખર! ધર્મપુરીવિલસન્નિલય! ॥

ત્વદ્દર્શનં યદિ લભે ન તુ નીલકણ્ઠ!
નામં ભજામિ યદિ કણ્ઠગતં ન તે હિ ।
રૂપં સ્મરામિ તવ ચેન્ન મનોહરં મે
તજ્જીવનં મમ નિરર્થકમેવ શમ્ભો ॥

પ્રાતઃકાલવર્ણનં ગોદાવરી

લક્ષ્મીનૃહરેઃપદાબ્જલસિતા બ્રહ્માદિદેવૈર્યુતા
યા રામાર્ચિતરામલિઙ્ગનિલયા ભક્તાઘવિધ્વંસિની
યસ્યાઃ પ્રાગ્દિશિ ગૌતમી રવિકરાન્ પ્રક્ષાલયન્તી સદા
સેયં ધર્મપુરી સનાતનપુરં ક્ષેત્રં સતીર્થં મહત્ ॥ ૧॥

ગોદાવરીગતસુરાર્પણકૌતુકેન્દુઃ
પીયૂષભાણ્ડપરિપૂર્ણસુધાકરો ઽયમ્ ।
વીચીનિબદ્ધપ્રતિબિમ્બતનુર્નિતાતં
સૂર્યોદયે લસતિ ગચ્છતિ ખાન્નિશેશઃ ॥ ૨॥

ગોદાવરીવરજલેષુ વિનોદમિચ્છુઃ
તારાયુતો વરતરઙ્ગહૃતાત્મરૂપઃ ।
આવૃત્ય વાર્વસિતકૈરવમાત્મબન્ધું
સૂર્યોદયે લસતિ ગચ્છતિ ખાદ્ધિમાંશુઃ ॥ ૩॥

નિષ્કાસ્ય દ્વિજરાટ્ તમોઽન્ધપટલં યાત્યેકતો હ્યમ્બરાત્
નિદ્રામુદ્રિતમાનવાન્ દ્વિજવરાઃ જાગ્રન્તિ રાવૈર્મુહુઃ ।
છિત્ત્વાઽન્ધં દ્વિજકાન્તિભિર્દ્વિજવરાઃ શ્રાવ્યન્તિ વેદશ્રુતીઃ
પ્રાતર્ધર્મપુરીપુરસ્ય હિ જનાન્ કુર્વન્તિ ચૈતન્યકાન્ ॥ ૪॥

ગૌતમ્યાસ્તુ તરઙ્ગપઙ્ક્તિનિનદૈર્માધુર્યમાપૂર્યતે
આબ્રાહ્મી હરિતાશ્ચ છાત્રવટવઃ પૂર્યન્તિ વેદશ્રુતીઃ ।
ગાવોઽમ્ભેતિ નદન્તિ વત્સકગણં સ્વોધાસ્યદાનાય તાઃ
પ્રાતર્ધર્મપુરં હિ મઙ્ગલકરૈર્ધ્વાનૈઃ પવિત્રીકૃતમ્ ॥ ૫॥

યસ્યાં બ્રાહ્મણપુઙ્ગવૈરનુદિનં સુસ્નાતલિપ્તાઙ્ગકૈઃ
ગાયત્રી શ્રુતિરાવ સુસ્વરગલૈર્દત્તાઞ્જલિર્ભાસ્કરઃ ।
સ્નાત્વા ક્ષાલિતરશ્મિભિર્નરહરિં સન્દ્રષ્ટુકામો મુદા
નિદ્રામુદ્રિતપદ્મમુન્નયતિ યઃ સંસેવનાય પ્રભોઃ ॥ ૬॥

ગોદાવરીવિમલવારિતરઙ્ગહૃદ્યૈ-
ર્યત્કૈરવૈર્રતિમુપેત્ય મુદા નિશાન્તે ।
ઇન્દૌ ગતે હિ કમલાનિ નિમીલિતાનિ
ઉન્મીલ્ય ભાસ્કરકરૈર્વિકસન્તિ પ્રાતઃ ॥ ૭॥

યે ચૈવ બદ્ધતનવઃ કમલોદરેષુ
ભૃઙ્ગા હિ ભાનુહૃતચિત્તમુમુક્ષવસ્તે ।
સન્તુષ્ટભાસ્કરકરૈઃ સુવિમુક્તસઙ્ગાઃ
ગીતોપદેશકવરા નનુ યાન્તિ ચોર્ધ્વમ્ ॥ ૮॥

શ્રી વૈષ્ણવા નૃહરિસેવનતત્પરાશ્ચ
દિક્પૂર્યમાણશુભમઙ્ગલવાદ્યઘોષૈઃ ।
ગોદોદપૂર્ણવરહેમઘટા નિવૃત્ય
નિર્યાન્તિ વેદપઠનૈર્ભૃતદેવચિત્તાઃ ॥ ૯॥

ગોપાલબાલકગણૈર્ધૃતહસ્તદણ્ડૈઃ
ગાવો મુદા પ્રતિગૃહાત્ કિલ મુક્તબન્ધાઃ ।

વાત્સલ્યદત્તપયસોઽન્વયગોગણાશ્ચ
ગોદાવરીતટવનં હ્યુપયાન્તિ ધીરમ્ ॥ ૧૦॥

કોક્કોરકોધ્વનિયુતૈર્નનુ કુક્કુટૈશ્ચ
દિક્પૂર્યમાણનિનદૈઃ પ્રવિમુક્તકણ્ઠૈઃ ।
જાગ્રન્તિ યેન હિ વિબુધ્ય વર ત્યક્ત મઞ્ચાઃ
યદ્ધૌતમીનિવહનાય જનાસ્તુ યાન્તિ ॥ ૧૧॥

યદ્ગાયતો બુધ સદાશિવ વિશ્વનાથૌ
રાજન્નશાસ્ત્રિકૃતવાઙ્મયસેવનં તુ ।
પ્રાભાતિકં નનુ સકીર્તનચિત્તજિહ્વાઃ
ગોદાવગાઢતનવઃ સ્વગૃહાણિ યાન્તિ ॥ ૧૨॥

ગોદાં હિ ગોપતરુણીમણયસ્તરણ્યાં
ગોક્ષીરપૂરિતઘટાઃ બહવો તરન્ત્યઃ ।
ગ્રામં પ્રવિશ્ય મધુરસ્વરકણ્ઠરાવૈઃ
ઉદ્ઘોષયન્તિ નનુ વિક્રયણાય દુગ્ધમ્ ॥ ૧૩॥

કન્યા ગૃહાઙ્ગણતલં પરિશુધ્ય ચાદ્ભિઃ
કૃત્વા મુદા રજિતભાસિતરઙ્ગવલ્લીમ્ ।
સન્દીપ્રગોમયગિરિપ્રતિમા વિધાય
કુર્વન્તિ ચાપહૃતચિત્તજના હિ માર્ગમ્ ॥ ૧૪॥

ગઙ્ગે ! ત્રિવિક્રમપદોદ્ભવિ ! હે સુરાર્ચ્યે !
ત્રૈલોક્યપાવનિ! શિવજટાહૃતવારિરૂપે! । ?
વિધ્વસ્ત ગૌતમમહર્ષિકૃતાઘરાશે!
ત્વં જાગૃહીત્યુષસિ ભક્તવરાઃ સ્તુવન્તિ ॥ ૧૫॥

અભ્યાગતા વિવિધદેશસમાગતાશ્ચ
અબાલવૃદ્ધપુરવાસગણાશ્ચ વીથ્યામ્ ।
સ્નાત્વાઽઽગતાન્ દ્વિજવરાનભિવન્દ્ય નમ્રાઃ
ગોદાનિમજ્જનપરાસ્ત્વરિતં પ્રયાન્તિ ॥ ૧૬॥

શ્રીશેષયોક્તનિગમાન્તભૃતાત્મતત્ત્વં
યન્નારસિંહશતકં હરિભક્તિસારં
ભ્રાજન્નૃસિંહચરણાબ્જકહૃષ્ટચિત્તાઃ
ગાયન્તિ પ્રોદ્ગલિતગાનયુતા સ્તુ નાર્યઃ ॥ ૧૭॥

માલાં ક્વચિદ્ધિ ધનુરાકૃતિભઙ્ક્વચિચ્ચ
ખડ્ગં ક્વચિન્નનુ સુદર્શનરૂપમન્યત્ ।
ભિન્નૈઃ સદાકૃતિવિશેષગણૈર્બલાકાઃ
બધ્નન્તિ ધર્મપુરમમ્બરવીથિમાર્ગમ્ ॥ ૧૮॥

પિત્રાજ્ઞયા ગતવનો રઘુરામચન્દ્રઃ
સ્નાત્વા ચ યત્ર પિતરં ત્વકરોદ્ધિ તૃપ્તમ્ ।
ભક્ત્યાર્ચયત્ સ્વકૃતસૈકતલિઙ્ગમૂર્તિં
તદ્ગૌતમીસ્થસિકતા હિ પુનન્તિ ભક્તાન્ ॥ ૧૯॥

સઙ્કલ્પમન્ત્રપઠના વટવા સ્તુ કેચિત્
કેચિન્નિમજ્જનપરા હરશબ્દપૂર્વમ્ ।
સન્ધ્યાન્ત્વુપાસનપરાઃ સુનિમીલિતાક્ષાઃ
ગોદાજલેષુ વિધિકર્મરતા દ્વિજા હિ ॥ ૨૦॥

શ્રીનારસિંહ વચસા ત્વનુલાત્મજઃ કિં
આજ્ઞાપયેત્ કપિકુલં પુરરક્ષણાર્થમ્ ।
યત્ ત્રાસયન્તિ શઠબુદ્ધિનરાંસ્તુ વીથ્યાં
સૌધાગ્રભાગવિહરદ્ વરવાનરા હિ ॥ ૨૧॥

ઉદ્યદ્દિનેશકિરણૈર્જ્વલદગ્નિતેજઃ
સ્નાતાનુલિપ્તવરભક્તસમાહ્વનાય ।
યદ્ રાજગોપુરમહો હરિમન્દિરસ્ય
ધીરં વિલોકયતિ પૂર્વદિશાભિમુખ્યમ્ ॥ ૨૨॥

યદ્રાજગોપુરગવાક્ષકવાટમાર્ગાત્
આવૃત્ય પક્ષિનિવહાન્ ખલુ મેઘમાલાઃ ।
ગચ્છન્તિ મન્દિરમહો શુભકૃષ્ણવર્ણાઃ
દ્રષ્ટું રમાનરહરિં વિનતા નિનાદૈઃ ॥ ૨૩॥

બ્રહ્માદિ દેવગમનાય શુભાઙ્કિતં હિ
ભક્તાગ્રદૈત્યગમનાય મહોન્નતં ચ ।
યત્સ્વાગતાદરણપૂર્વક ભૃત્યવર્ગં
યદ્રાજગોપુરમહો કિમુ વર્ણશક્યમ્ ॥ ૨૪॥

દીવ્યત્ સુવર્ણકલશૈર્નનુ ભ્રાજમાનં ?

આકાશચુમ્બનપરં શિખરાગ્રભાગમ્ ।
આદિત્યદૈત્યપ્રતિમાહૃતચિત્તહૃદ્યં
યદ્રાજગોપુરમહો કિમુ વર્ણશક્યમ્ ॥ ૨૫॥

દૈનન્દિકેન વિધિના ગગનાન્તરાલાત્
સપ્તાશ્વવાહનરથં ત્વધિરૂઢભાનુમ્ ।
આયાન્તમાહ્વયતિ હિ શ્રમમોચનાય
યદ્ ગોપુરં ધૃતકપોત સુપુષ્પમાલમ્ ॥ ૨૬॥

વરાહતીર્થમ્
યસ્મિન્ મુદા નિવહનાદ્ધિ સભાર્યકશ્ચ
ચિન્તામણિઃ પરમવાપ હિ મુક્તિમાર્ગમ્ ।
ચિન્તમણીતિ યદગાદ્ધિ સરઃ પ્રસિદ્ધં
વારાહતિર્થમિહ રાજતિ ધર્મપુર્યામ્ ॥ ૨૭॥

લક્ષ્મીનૃસિંહવિભુદર્શનસાભિલાષં
ગ્રામં પ્રવિષ્ટમતિથિં નનુ સાદરેણ ।
ભૃઙ્ગાનુરઞ્જિતસુમઙ્ગલવાદ્યઘોષૈઃ
સુસ્વાગતં વદતિ ચેહ વરાહતીર્થમ્ ॥ ૨૮॥

ઉત્થાય ચૈકચરણં ચ નિમીલ્ય નેત્રે
ધ્યાનૈકચિત્તવિલસજ્જલધિપ્રસુપ્તાઃ ।
નિષ્કિમ્પમાનલસદઙ્ગવિભાસવૃક્ષાઃ
કિં તાપસાનનુસરન્તિ બકા હિ તીરે ॥ ૨૯॥

પ્રાતઃ સદા ? મુકુલીકૃતહસ્તકુડ્મં ?
સન્તુષ્ટકં વિકસિતાનનપદ્મવૃન્દમ્ ।
અભ્યાગતાય મધુપાય વિનમ્રભાવૈઃ
દત્ત્વા હિ મધુપર્કમનન્યચિત્તં
વારાહતીર્થમિહ શિક્ષતિ ચાતિથેયમ્ ॥ ૩૦॥

લોકૈકરક્ષણવિધૌ હતહેમનેત્રઃ
શ્રીશો ધૃતક્ષિતિમૃદઙ્કિતદંષ્ટ્રભાગાન્ ।
પ્રક્ષાલ્ય પૂતમકરોત્સ તીર્થમ્
વારાહતીર્થમિહ રાજતિ ધર્મપુર્યામ્ ॥ ૩૧॥

ઇતિ કોરિડે વિશ્વનાથશર્મણાવિરચિતં ધર્મપુરી

ગોદાવરી વર્ણનં સમ્પૂર્ણમ્ ।

Composed by Koride Vishwanatha Sharma Dharmapuri Telangana
Proofread by Koride Vishwanatha Sharma.

---

*dharmapurI godAvarI varNanam*

pdf was typeset on June 28, 2023

Please send corrections to *sanskrit@cheerful.com*